श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री श्रीनिवासाचार्यसूरिणा विरचिता

# ॥ श्री मयूरपुर वेङ्कटेशस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री मयूरपुर वेङ्कटेशस्तुतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

लक्ष्मीपते ! कमलनाभ ! सुरेश ! विष्णो !
विश्वेश ! विश्व ! मधुसूदन ! चक्रपाणे !।
वैकुण्ठ ! माधव ! जनार्दन ! वासुदेव !
मां पालयाशु कृपया वृषशैलनाथ ! ॥ 1 ॥

त्वां मातरं च पितरं च गुरुं सुबन्धुं
सन्तस्समेत्य शरणं सुहृदं वदन्ति।
निस्सीमनित्यनिरवद्यसुखप्रकाशं
श्री वेङ्कटाचलपते ! शरणं गतोऽस्मि ॥ 2 ॥

ब्रह्मेन्द्ररुद्रधनदादिकिरीटकोटि -
संसेविताङ्घ्रिकमलामलकान्तिधामन्।
लक्ष्मीलसत् हृदयपङ्कजराजहंस !
मां पालयाशु कृपया वृषशैलनाथ ! ॥ 3 ॥

वेदान्तवेद्य ! मुनिमानसराजहंस !
पद्मालयाञ्चितमनोहरहृत्प्रदेश !।
इन्द्रादिदासजनपूजितपादपद्म !
मां पालयाशु कृपया वृषशैलनाथ ! ॥ 4 ॥

योगीन्द्र नाथमुनि यामुन नित्यसूरि -
श्रुत्यन्तदेशिकहृदम्बुजसन्निवास !।
भक्ताभिलाषपरिपूरणबद्धदीक्ष !
मां पालयाशु कृपया वृषशैलनाथ ! ॥ **5** ॥

संसारकूपमतिघोरमगाधमूलं
संप्राप्य दुःखशतसर्पसमाकुलस्य।
दीनस्य देव कृपया पदमागतस्य
शोकं व्यपोह्य पदसात्कुरु मानिवास ! ॥ **6** ॥

संसारभीकरकरीन्द्रकराभिघात -
निष्पीड्यमानवपुषं सकलार्तिनाश।
प्राणप्रयाणभवभीतिसमाकुलं च
मां पालयाशु कृपया वृषशैलनाथ ! ॥ **7** ॥

बद्ध्वा गले यमभटाः बहु तर्जयन्तः
कर्षन्ति यत्र भवपाशशतैर्युतं माम्।
एकाकिनं परवशं चकितं दयालो !
मां पालयाशु कृपया वृषशैलनाथ ! ॥ **8** ॥

ब्रह्मा गिरीश इतरेऽप्यमरा य एते
निर्धूय तान् निरयतुल्यफलप्रदातॄन्।
त्वामेव सर्वफलदं हि परावरज्ञाः
निश्चित्य त्वत्पदसरोरुहमाश्रयन्ति ॥ **9** ॥

कर्तव्यमित्यनुकलं कलयाम्यकृत्यं
स्वामिन्नकृत्यमिति कृत्यमपि त्यजामि।
एतद्व्यतिक्रमणजातमनर्थजातं
क्षन्तुं त्वमर्हसि विभो ! वृषभाचलेश ! ॥ **10** ॥

स्वामिन् ! रमेश ! कृपणे सति रक्षणीये
नोपेक्षणं मयि तवोचितमीश्वरस्य।
त्वज्ज्ञानशक्तिकरुणासु सतीषु देव
मां पालयाशु कृपया वृषशैलनाथ ! ॥ **11** ॥

त्यक्त्वा सुरेश ! बहुदोषगुणैर्युतं मां
किं वा लभेत मितदोषगवेषणेन।
नो चेत् प्रसीदसि दयादिगुणा भवेयुः
व्यर्थास्त्वदीयपदपङ्कजमानतोऽस्मि ॥ **12** ॥

श्रीशेष शेषाशन वैनतेय
नित्यादिसंपूजितपादपद्म !।
संसारदुर्व्याधिनिपीडितं मां
दीनं रुदन्तं कृपयाऽभिरक्ष ॥ **13** ॥

॥ इति श्री मयूरपुर वेङ्कटेशस्तुतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥